# द्वितीयः घट्टः



# राज्यसर्वकार:

## शिक्षकाणां कृते

एतौ द्वौ अध्यायौ अर्थात् द्वितीयः अध्यायः तृतीयः अध्यायः च राज्यसर्वकारस्य विषये सन्ति तथा च दृढानाम् उदाहरणानां माध्यमेन सर्वकारस्य कार्यं तस्य संरचनां च प्रस्तौतुं प्रयासं कुरुतः । अस्माभिः एतस्मिन् स्वास्थ्यक्षेत्रतः सम्बद्धानि उदाहरणानि स्वीकृतानि अपरञ्च कानिचन अन्यानि उदाहरणानि अपि तावन्ति एव महत्त्वपूर्णानि भवितुं शक्नुवन्ति स्म।

द्वितीयः अध्यायः जनानां कृते महत्त्वयुक्तस्य विषयस्य रूपेण स्वास्थ्यस्य चर्चां करोति । स्वास्थ्यसेवानां सार्वजनिकं व्यक्तिगतं च इति पक्षद्वयम् अस्ति । भारते स्वास्थ्यसुविधाः सर्वेभ्यः सुलभाः न सन्ति । यद्यपि अस्माकं संविधानस्य अनुसारं स्वास्थ्यस्य अधिकारः अस्माकं मौलिकानाम् अधिकाराणां भागः वर्तते तथापि एषः सर्वेषां कृते समानरूपेण उपलब्धः नास्ति । अत्र प्रदत्तविवरणानां साहाय्येन विद्यार्थिनः इदं द्रष्टुं शक्ष्यन्ति यत् सर्वकारतः अपेक्षितं साहाय्यं तथा च आदर्शाः के भवेयुः अपि च तेषां संरचनायाः पृष्ठे कीदृशाः तर्काः आधारः च निहितः वर्तते । वर्तमानानां स्थितीनां परिवर्तनार्थं केषाञ्चित् उपायानां चर्चा अपि अस्मिन् अध्याये कृता अस्ति।

सर्वकारस्य कार्यप्रणाली-प्रतिनिधित्व-उत्तरदायित्व-सार्वजनिक-हित-सदृशानाम् अवधारणानां विषये चर्चा तृतीये अध्याये कृता अस्ति । यद्यपि विधायिकायाः कार्यकारिण्याः च इति द्वयोः विषये चर्चा कृता अस्ति। अस्माभिः एषा अपेक्षा न करणीया यत् विद्यार्थिनः एतयोः द्वयोः मध्ये जातानां सूक्ष्म-अन्तराणां विषये सम्पूर्णतया ज्ञास्यन्ति । एतद् एव उत्तमं स्यात् यत् वयं धैर्यपूर्वकं बहूनां प्रश्नानां विषये तेषां अवधानस्य आकर्षणं कुर्मः अपि च तान् विषयान् अवगन्तुं तेषां प्रोत्साहनं कुर्याम यथा 'सर्वेषु जनेषु शक्तिशाली जनः कः प्रतीयते ?' 'विधायकः एतस्याः समस्यायाः समाधानं किमर्थं न कर्तुं शक्नोति?' इत्यादितथ्यानां विषये चर्चा अस्ति । एतादृशानां प्रश्नानां साहाय्येन ते सर्वकारीय-संरचनायाः तर्कान् आधारान् च स्वयं स्वमनसि निर्मातुं समर्थाः भविष्यन्ति।

इदम् अत्यावश्यकम् अस्ति यत् बालकाः सार्वजनिकेषु विषयेषु स्वविचारान् प्रकटयितुम् आत्मविश्वासं प्राप्नुयुः तथा च एतेषाम् अध्यायानाम् अभ्यासान् कुर्वन्तः सर्वकारस्य दायित्वस्य विषये सम्यग्रूपेण जानीयुः । भवन्तः तैः सह चर्चां कर्तुं तथा च समस्यानां समाधानम् अन्वेष्टुम् अनेकेषां परिचित-विषयाणां चयनं कर्तुं शक्नुवन्ति यथा जलस्य यातायातस्य विद्यालयीयस्य शुल्कस्य च विषये पुस्तकानां विषये बालश्रमादिविषये च चर्चां कर्तुं शक्नुवन्ति । भित्तिपत्रस्य माध्यमेन ते बालकाः स्वविचारान् प्रकटयितुं स्वतन्त्राः भवेयुः। सर्वकारस्य तस्य कार्याणां च विषये या चर्चा भवति सा प्रायः जाड्यं जनयति । अतः इदम् इतोऽपि आवश्यकं भवति यत् एतेषाम् अध्यायानां पठनपाठनकाले वयं कक्षां शिक्षामयीं न कुर्मः अपितु तदपेक्षया चर्चापूर्णां विचारविमर्शयुक्तां तथा च गतिविधिपूर्णां कुर्याम।






## स्वास्थ्यस्य विषये सर्वकारस्य भूमिका

लोकतन्त्रे जनानाम् इयम् अपेक्षा भवति यत् सर्वकारः तेषां कल्याणाय कार्यं कुर्यात् । एतस्याः अपेक्षायाः पूर्तिः तदा भवितुं शक्नोति यदा सर्वकारः तेषां कृते शिक्षायाः स्वास्थ्यस्य कृते काञ्चित् व्यवस्थाम् अपि च वृत्तिप्रदानं गृहनिर्माणं च कुर्यात् राजमार्गाणां विकासः विद्युतः उपलब्धता च स्यात् । एतस्मिन् अध्याये वयं स्वास्थ्यस्य कः अर्थः इति विषये स्वास्थ्येन सम्बन्धितसमस्यानां च विषये निरीक्षणं करिष्यामः। एतस्य अध्यायस्य उपशीर्षकाणि पश्यामः। भवतां विचारेण एषः विषयः सर्वकारस्य कार्यतः केन प्रकारेण सम्बद्धः अस्ति ?



## स्वास्थ्यं किम् अस्ति?

स्वास्थ्यस्य विषये वयं विविधप्रकारेण चिन्तयितुं शक्नुमः। स्वास्थ्यस्य अर्थः अस्ति अस्माकं रोगेभ्यः व्रणेभ्यः च मुक्तिः। परन्तु स्वास्थ्यं केवलं रोगसम्बन्धितम् एव नास्ति। भवतां दृष्ट्याम् उपरि प्रदर्शिते चित्रसमूहे केवलं काश्चन घटनाः एव स्वास्थ्यसम्बद्धाः स्युः । प्रायः वयम् अवधानं न कुर्मः यत् उपर्युक्तायाः प्रत्येकं स्थितेः सम्बन्धः स्वास्थ्येन अस्ति । रोगम् अतिरिच्य अस्माभिः तेषु कारणेषु अपि अवधानम् अवश्यं करणीयम् अस्ति यः अस्माकं स्वास्थ्ये प्रभावं जनयन्ति । उदाहरणार्थं यदि जनाः पानीयं जलं प्रदूषणमुक्तं वातावरणं प्राप्नुयुः तर्हि ते समान्यतया स्वस्थाः भविष्यन्ति। अपरदृष्ट्या यदि जनाः उदरपूर्त्यर्थं भोजनं न प्राप्नुयुः अथवा ते कष्टपूर्णं जीवनं जीवितुं बाध्याः भवेयुः तर्हि ते अधिकाः रुग्णाः भविष्यन्ति।

वयं सर्वे इच्छामः यत् वयं यत् कार्यं कुर्मः तत् स्फूर्त्या उच्चमनोबलेन च कुर्याम । शिथिलतया अकर्मण्यतया च चिन्ताग्रस्तः भूत्वा तथा च चिरकालं यावत् भयाक्रान्तभावेन जीवनीयम् इति स्वस्थजीवनस्य लक्षणानि न सन्ति। अस्माभिः सर्वैः अपि निरुद्विग्नतया प्रसन्नैः च भाव्यम्। अस्माकं जीवनस्य एते सर्वे पक्षाः स्वास्थ्यस्य भागाः सन्ति।

*किं भवन्तः एतानि सर्वाणि चित्राणि अथवा एतेषु कानिचन चित्राणि स्वास्थ्यसम्बद्धानि मन्यन्ते ? यदि आम्, तर्हि कथम् ? समूहे चर्चां कुर्वन्तु।*

*उपरि प्रदत्तेषु चित्रेषु स्थितिद्वयं चिन्वन्तु ये स्वास्थ्यसम्बद्धे न स्तः। ते कथं स्वास्थ्यसम्बद्धे भवितुं शक्नुतः एतस्मिन् विषये वाक्यद्वयं लिखन्तु।*

## भारते स्वास्थ्यसेवाः

*किं भवन्तः एतेषां स्तम्भानां कृते किमपि शीर्षकं दातुं शक्नुवन्ति?*

आगच्छन्तु भारते स्वास्थ्यसेवानां केषाञ्चित् पक्षाणां परीक्षणं कुर्याम। अत्र प्रदत्तायाः तालिकायाः प्रथमद्वितीययोः स्तम्भयोः दर्शितस्थितीनां तुलनां कुर्वन्तु।

| | |
|---|---|
| सम्पूर्णस्य संसारस्य अपेक्षया भारते सर्वाधिकाः चिकित्सामहाविद्यालयाः सन्ति तथा च अत्र अधिकतराः चिकित्सकाः चिकित्सार्थं सज्जीक्रियन्ते। प्रायः प्रत्येकं वर्षे 15000 नूतनाः चिकित्सकाः योग्यतां प्राप्नुवन्ति। | भारते अधिकांशाः चिकित्सकाः नगरेषु वसन्ति। ग्रामवासिभिः चिकित्सार्थं बहुदूरम् आगन्तव्यं भवति। ग्रामीणक्षेत्रेषु जनसङ्ख्यायाः अपेक्षया चिकित्सकानां सङ्ख्या अत्यल्पा वर्तते। |
| विगतेषु केषुचित् वर्षेषु स्वास्थ्यसेवानां सौविध्येषु महती वृद्धिः जाता अस्ति। 1950 तमे वर्षे भारते केवलं 2,717 चिकित्सालयाः आसन्। 1991 तमे वर्षे 11,174 चिकित्सालयाः आसन् अपि च 2000 तमे वर्षे एषा सङ्ख्या वर्धित्वा 18,218 अभवत्। | भारते प्रायेण पञ्चलक्षजनाः प्रतिवर्षं क्षयरोगेण म्रियन्ते। स्वतन्त्रताप्राप्तेः आरभ्यः अधुनापर्यन्तम् एतस्यां सङ्ख्यायां किमपि परिवर्तनं न अभवत्। प्रत्येकं वर्षे सन्निपातज्वरस्य प्रायेण विंशतिलक्षघटनाः दृष्टिपथम् आयान्ति। एषा सङ्ख्या न्यूनतां न गच्छति। |
| विदेशेभ्यः भारतं प्रति बहवः चिकित्सापर्यटकाः चिकित्सार्थम् आगच्छन्ति। ते उपचारार्थं भारतस्य केषुचित् एतादृशेषु चिकित्सालयेषु आगच्छन्ति येषां तुलनां संसारस्य सर्वश्रेष्ठैः चिकित्सालयैः सह कर्तुं शक्यते। | वयं सर्वेषां कृते पानीयं जलं न प्रापयामः। सञ्चारणीयाः रोगाः जलेन परस्परं गच्छन्ति। एतेषु रोगेषु 21% रोगाः जलजनिताः भवन्ति। यथा अतिसारः उदरकृमयः हैपेटाइटिसरोगः च। |
| भारतम् औषधोत्पादनदृष्ट्या विश्वस्य देशेषु चतुर्थं स्थानं भजते तथा च इतः अधिकमात्रया औषधीनां निर्यातः भवति। | भारतस्य समस्तेषु बालकेषु पञ्चाशत्- प्रतिशतेभ्यः बालकेभ्यः पर्याप्तं भोजनं न लभन्ते तथा च ते कुपोषणग्रस्ताः भवन्ति। |

*भारते प्रायः एतद् उच्यते यत् वयं सर्वेषां कृते स्वास्थ्यसौविध्यानि दातुम् असमर्थाः स्मः यतोहि सर्वकारस्य पार्श्वे एतदर्थं पर्याप्तं धनं नास्ति। उपरिप्रदत्तं वामभागस्थं स्तम्भं पठित्वा किं भवन्तः एतत् सम्यक् अनुभवन्ति? चर्चां कुर्वन्तु।*

रोगेभ्यः रक्षार्थं तेषां रोगाणां उपचारार्थं च अस्मभ्यम् औचित्यपूर्णाः स्वास्थ्य-सुविधाः आवश्यक्यः सन्ति। यथा स्वास्थ्यकेन्द्राणि चिकित्सालयाः परीक्षणार्थं प्रयोगशालाः रोगिवाहनस्य च सुविधा रक्तकोशादयः च, यैः रोगिणाम् आवश्यक-स्वास्थ्य-सेवा निरीक्षणं च भवेत्। एतादृशीनां सुविधानां व्यवस्थां सञ्चालयितुम् अस्माकं कृते स्वास्थ्य-सेवकानां परिचारिकाणां योग्य-चिकित्सकानाम् अन्य-विशेषज्ञानां च आवश्यकता वर्तते ये उचितं परामर्शं दद्युः रोगस्य परिचयं दातुं समर्थाः भवेयुः तथा च उपचारं कर्तुं समर्थाः भवेयुः। रोगिणां चिकित्सार्थम् अस्मभ्यं आवश्यकानि औषधानि उपकरणानि च आवश्यकानि। यदा वयं रुग्णाः भवामः तदा स्वचिकित्सार्थम्, अस्माकं कृते एतेषां सुविधानाम् आवश्यकता भवति।

भारते अधिकसङ्ख्यायां चिकित्सकाः औषधालयाः चिकित्सालयाः च सन्ति । देशस्य पार्श्वे सार्वजनिक-स्वास्थ्यसेवाः चालयितुं पर्याप्तः अनुभवः ज्ञानं च अपि विद्यते । एते तादृशाः चिकित्सालयाः तादृशानि स्वास्थ्यकेन्द्राणि च सन्ति येषां सञ्चालनं सर्वकारः करोति । सर्वकारः स्वजनसङ्ख्यायाः कस्यचित् बृहद्भागस्य सुरक्षां कर्तुं समर्थः अस्ति यः शताधिकेषु सहस्रेषु च ग्रामेषु विस्तृतः अस्ति । एतस्मिन् विषये वयं पश्चात् विस्तरेण चर्चां करिष्यामः । एतेन सह चिकित्साविज्ञाने महती असाधारणा प्रगतिः जाता अस्ति यस्याः कारणतः देशे चिकित्सायाः नूतनानि कौशलानि विधयः च उपलब्धाः सन्ति ।

तथापि द्वितीयः स्तम्भः दर्शयति यत् अस्माकं देशे स्वास्थ्यस्य स्थितिः कियती विकृता अस्ति । उपर्युक्तस्य सकारात्मकस्य विकासानन्तरम् अपि वयं जनतायाः कृते उचित-स्वास्थ्य-सुविधाः दातुम् असमर्थाः स्मः । एषा विरोधाभासोत्पादिका स्थितिः अस्ति या अस्माकम् अपेक्षाभ्यः विपरीता अस्ति । अस्माकं देशे धनम् अस्ति ज्ञानम् अस्ति अनुभविनः जनाः च सन्ति तथापि वयं सर्वेषां कृते आवश्यक-स्वास्थ्यसेवाः दातुम् असमर्थाः स्मः । वयम् एतस्मिन् अध्याये एतस्याः स्थितेः केषाञ्चित् कारणानां विषये ज्ञास्यामः ।



***सर्वकारीयाणां चिकित्सालयानां रोगिभिः प्रायेण एतादृशीषु लम्बतरासु पङ्क्तीषु स्थित्वा प्रतीक्षा करणीया भवति ।***

***हाकिमशेखस्य कथा***

हाकिमशेखः पश्चिमबङ्ग-कृषि-श्रमिक-समितेः एकः सदस्यः आसीत्, पश्चिमबङ्ग-कृषि-श्रमिक-समितिः इति पश्चिमिबङ्गप्रान्ते कृषकश्रमिकानाम् एकं सङ्घटनम् अस्ति । 1992 तमे वर्षे एकस्मिन् दिने सायङ्काले हाकिमशेखः गच्छतः रेलयानतः अपतत् तथा च तस्य शिरसि गभीराः व्रणाः जाताः। तस्य स्थितिः बहुगभीरा जाता अपि च तस्य कृते त्वरितचिकित्सायाः आवश्यकता आसीत् ।

सः कोलकातायाः एकस्मिन् सर्वकारीये चिकित्सालये नीतः परन्तु तत्रत्यैः अधिकारिभिः सः तस्मिन् चिकित्सालये न प्रवेशितः यतोहि तत्र कापि शय्या रिक्ता न आसीत् । अपरस्मिन् चिकित्सालये आवश्यक्यः सुविधाः अपि च तस्य चिकित्सार्थम् आवश्यकाः विशेषज्ञाः न आसन् । अनेन प्रकारेण अत्यन्त-गभीर-अवस्थायां सः चतुर्दशहोरासु अष्टौ सर्वकारीयेषु चिकित्सालयेषु नीतः परन्तु कश्चित् अपि तं न प्रवेशितवान् ।

अन्ते सः एकस्मिन् निजचिकित्सालये प्रवेशितः यत्र तस्य चिकित्सा जाता । सः स्वचिकित्सार्थं बहुधनं व्ययीकृतवान् । यैः चिकित्सालयैः तस्य प्रवेशः अनङ्गीकृतः आसीत् तेषाम् उपेक्षापूर्णेन व्यवहारेण खिन्नः भूत्वा हाकिमशेखः अपि च पी.बी.के.एम.एस. इति समितिः न्यायालये अभियोगं नियोजितवन्तः।

*उपरि प्रदत्तां कथां पठन्तु । कल्पनां कुर्वन्तु यत् भवान् कश्चित् न्यायाधीशः अस्ति। भवान् हाकिमशेखं किं वदिष्यति ?*

## कस्याश्चित् चिकित्सायाः व्ययः

अमनः रञ्जनः च उत्तमे मित्रे स्तः। रञ्जनस्य कुटुम्बः साधनसम्पन्नः अस्ति अपरञ्च अमनस्य मातापितरौ यथाकथञ्चित् जीनवस्य निर्वहणं कुरुतः।









चिकित्सालयस्य भवनं तथा चाकचक्ययुक्तं प्रतिभाति स्म यत् अहं पञ्चताराल्पाहारगृहम् इति अनुभूतवान् । पिता कथयति स्म एषः कश्चित् निजचिकित्सालयः अस्ति तथा च उत्तमोत्तमानि चिकित्सासौविध्यानि तत्र लभन्ते।

स्वागतपटले एव पिता पञ्चशतरूप्यकाणि दत्तवान् जानाति भवान् चिकित्सकस्य निरीक्षणात् प्रागेव तत्र शोभनः सङ्गीतः ध्वन्यते स्म तथा च सर्वमपि कियत् स्वच्छतापूर्णं चाकचक्यपूर्णं च आसीत् ।





चिकित्सकः मां बहुविधानि परीक्षणानि कारयितुम् उक्तवान्... परन्तु तत्र तु सर्वे जनाः मित्रवत् परस्परं वार्तालापं कुर्वन्ति स्म ! एकया महिलया निरीक्षणार्थं मम रक्तं स्वीकृतं वार्तालापप्रसङ्गे एव मत्तः रक्तं स्वीकृतवती तस्माद् अहं वेदनामेव न अनुभूतवान् !

यदा सर्वेषां परीक्षणानां परिणामाः समागताः तदा वयं पुनः चिकित्सकस्य पार्श्वे गतवन्तः । सः परिणामान् निरीक्षितवान् तथा च उक्तवान् यत् सर्वं सम्यक् अस्ति भवान् केवलम् आगमज्वरेण ग्रस्तः अस्ति । सः कानिचन औषधानि लिखितवान् आसीत् अपि च सः विश्रान्त्यर्थं माम् उक्तवान् आसीत् ।















अपि च सत्यम् एव कियान् कालः तत्र व्यतीतः! वयम् एकं महान्तं चिकित्सालयं गतवन्तः। अस्माभिः ओ .पी.डी स्थले एव एकस्यां दीर्घायां पङ्क्तौ स्थातव्यम् अभवत्। मम स्वास्थ्यं तथा विकृतिं गच्छति स्म यत् अहं तु सम्पूर्णे काले पितुः आश्रयं स्वीकृत्य तत्र स्थितवान्।



यदा अस्माकं क्रमः आगतः तदा चिकित्सकः मम निरीक्षणं कृतवान् तथा च रक्तस्य निरीक्षणं कारयितुम् उक्तवान्। एतस्य कृते अस्माभिः एकस्याम् इतोऽपि दीर्घतरायां पङ्क्तौ स्थातव्यम् अभूत्। यत्र निरीक्षणार्थं रक्तं स्वीक्रियते स्म तत्र अपि बहु सम्मर्दः भवति स्म।



दिनत्रयाद् अनन्तरं वयं रक्तनिरीक्षणस्य विषये सूचनां प्राप्तवन्तः.. पुनः वयं चिकित्सालयं गतवन्तः। तस्मिन् दिने तत्र काचित् अपरा महिलाचिकित्सिका उपविष्टा आसीत्।











*यदा भवन्तः रुग्णाः भवन्ति तदा कुत्र गच्छन्ति? किं भवद्भिः काश्चन समस्याः अनुभूयन्ते ? स्व-अनुभवानाम् आधारेण एकम् अनुच्छेदं लिखन्तु। सर्वकारीय-चिकित्सालये अमनः कासां कासां समस्यानां साक्षात्कारं कर्तुं बाध्यः जातः? भवतां चिन्तनानुसारं चिकित्सालयः कथं सम्यक्प्रकारेण कार्यं कर्तुं शक्नोति ? चर्चां कुर्वन्तु ।*

*रञ्जनः एतावद् धनं कथं व्ययीकर्तुं बाध्यः जातः? कारणं ज्ञापयतु ।*

*निजचिकित्सालयेषु वयं काभिः समस्याभिः बाधिताः भवामः? चर्चां कुर्वन्तु ।*

***अस्माभिः सर्वकाराय राजस्वं किमर्थं दातव्यं भवति ?***

*सर्वकारः राजस्वस्य माध्यमेन प्राप्तधनस्य उपयोगं विभिन्न-सार्वजनिक-सेवाः दातुं करोति यतः सर्वे जनाः लाभान्विताः भवन्ति ।*

*प्रतिरक्षा-आरक्षक-न्यायिक-व्यवस्था-राजमार्गादिभ्यः सेवाभ्यः सर्वे नागराः लाभान्विताः भवन्ति । अन्यथा एतासां सेवानां व्यवस्थां स्वयं नागराः न कर्तुं शक्नुवन्ति ।*

*राजस्वैः एव केचन विकासात्मकाः कार्यक्रमाः सेवाः च उपलब्धाः भवन्ति यथा शिक्षा स्वास्थ्यं वृत्तिः सामाजिक-कल्याणयोजनाः व्यवसायिक-प्रशिक्षणादयः च भवन्ति यैः आवश्यकतावद्भ्यः नागरेभ्यः लाभः जायते । राजस्वतः प्राप्तधनस्य उपयोगः काभ्यश्चित् प्राकृतिकीभ्यः आपद्भ्यः यथा जलौघात् भूकम्पात् सुनाम्यादिभ्यः इत्यादिभ्यः नागराणां सुरक्षार्थं क्रियते तथा च पुनर्वासकार्यार्थं क्षतिपूर्त्यर्थं च क्रियते । अन्तरिक्ष-परमाणुः तथा च प्रक्षेपास्त्र-सम्बद्ध-कार्यक्रमाः अपि कराणां माध्यमेन एव चाल्यन्ते । सर्वकारः विशेषरूपेण निर्धनेभ्यः काश्चित् सेवाः ददाति याः ते विपणितः न स्वीकर्तुं शक्नुवन्ति । एतस्याः एकम् उदाहरणं स्वास्थ्य-सम्बद्ध-सेवा वर्तते । किं भवन्तः एतादृशम् एकम् उदाहरणं दातुं शक्नुवन्ति ?*

# सार्वजनिकसेवाः निजस्वास्थ्यसेवाः च

उपर्युक्त-कथायाः माध्यमेन भवन्तः ज्ञातवन्तः स्युः यत् वयं स्थूलरूपेण स्वास्थ्यसेवाः द्वयोः भागयोः विभक्तुं शक्नुमः -

अ) सार्वजनिकस्वास्थ्यसेवाः

ब) निजस्वास्थ्यसेवाः

## ***सार्वजनिकस्वास्थ्यसेवाः***

सार्वजनिक-स्वास्थ्यसेवा स्वास्थ्यकेन्द्राणां चिकित्सालयानां च काचित् शृङ्खला वर्तते या सर्वकारेण सञ्चाल्यते । एतानि केन्द्राणि चिकित्सालयाः च परस्परं सम्बद्धाः सन्ति यस्मात् एते नागरेषु ग्रामीणेषु च क्षेत्रेषु सुविधाः प्रददति तथा च सर्वेषां रोगाणां (साधारणतः विशेष-निरीक्षा-अपेक्षितरोगाणां) निवारणं कुर्वन्ति । ग्रामीणस्तरे कश्चित् स्वास्थ्यकेन्द्रं भवति यत्र प्रायः एका परिचारिका कश्चित् ग्राम-स्वास्थ्य-सेवकः भवति । एते सामान्यरोगस्य चिकित्सार्थं प्रशिक्षिताः भवन्ति तथा च प्राथमिक-स्वास्थ्य-केन्द्रस्य चिकित्सकानां निरीक्षणे कार्यं कुर्वन्ति । ग्रामीणेषु क्षेत्रेषु एतादृशं केन्द्रं बहूनां ग्रामाणाम् आवश्यकताः पूरयति । मण्डलस्तरेण कश्चित् मण्डलीयः चिकित्सालयः भवति यः एतेषां सर्वेषां चिकित्सालयानां निरीक्षणं करोति । महत्सु नगरेषु अनेके सर्वकारीय-चिकित्सालयाः भवन्ति एतेषु कश्चित् सः आसीत् यत्र अमनः नीतः आसीत् तथा च एतादृशाः अपि विशिष्टाः चिकित्सालयाः सन्ति येषां वर्णनं हाकिम-शेखस्य कथायाम् अभवत् ।

एताः स्वास्थ्यसेवाः बहुभिः कारणैः सार्वजनिकसेवाः इति उच्यन्ते । सर्वकारः सर्वेषां नागरिकाणां कृते स्वास्थ्यसेवाः प्रदातुं वचनबद्धः अस्ति । एतां वचनबद्धतां पूरयितुम् एते चिकित्सालयाः स्वास्थ्यकेन्द्राणि च स्थापितानि सन्ति । एताः सेवाः सञ्चालयितुं धनस्य व्यवस्था जनैः प्रदत्तेन करेण भवति । अतः एताः सुविधाः सर्वेषां कृते सन्ति । सार्वजनिकस्वास्थ्यव्यवस्थायाः कश्चित् महत्त्वपूर्णः पक्षः अयम् अस्ति यत् एतस्याः उद्देश्यं सुव्यवस्थित-रूपेण निःशुल्करूपेण च अत्यल्प-मूल्येन च स्वास्थ्य-सेवानां प्रदानम् अस्ति यतः निर्धनाः जनाः अपि रोगनिवारणं कर्तुं समर्थाः भवेयुः। स्वास्थ्य-सेवानाम् अन्यत् महत्त्वपूर्णं कार्यम् अस्ति रोगाणां शमनं यथा क्षयरोग-सन्निपात-ज्वर-पाण्डुरोग-अतिसार-विसूचिका-चिकनगुनिया इत्यादीनां विस्तारस्य नियन्त्रणम् । एतस्य व्यवस्था सर्वकारेण जनानां सहयोगेन करणीया भवति अन्यथा एषा व्यवस्था

विफला भविष्यति। उदाहरणार्थं मशकानां प्रजननसम्बन्धि अभियानं सफलीकर्तुम् इदं निश्चेतव्यं स्यात् यत् क्षेत्रस्य सर्वे जनाः स्ववातानुकूलक-यन्त्रेषु गृहछद्याम् इत्यादिषु जलस्य एकत्रीकरणं न भवेत् इति दिशि अवधानवन्तः भवेयुः।



ग्रामस्य कस्मिंश्चित् स्वास्थ्यकेन्द्रे रुग्ण-महिलायै औषधिं यच्छन्ती काचित् महिलाचिकित्सिका।

हाकिमशेखस्य प्रकरणं पुनः स्मरन्तु। किं भवन्तः ज्ञातुम् इच्छन्ति यत् तेषां विषये न्यायालयः कीदृशं निर्णयं कृतवान्?

अस्माकं संविधानस्य अनुसारं जनानां हितानि सुनिश्चेतव्यानि तथा च सर्वे जनाः स्वास्थ्यसेवायाः लाभं प्राप्नुयुः इति सर्वकारस्य प्राथमिकं कर्तव्यम् अस्ति।



एकस्मिन् सर्वकारीय-चिकित्सालये स्वरुग्णबालकेन सह काचित् महिला। यूनिसेफसंस्थायाः अनुसारं प्रतिवर्षं २० लक्षं शिशवः एतादृशैः सङ्क्रमणैः मृत्युं प्राप्नुवन्ति येषां सङ्क्रमणानां नियन्त्रणं सम्भवम् अस्ति।

सर्वकारेण प्रत्येकं जनस्य जीवनाधिकारः रक्षणीयः। न्यायालयेन उक्तम् अस्ति यत् हाकिमशेखः यादृशानि कष्टानि सोढवान् तैः तस्य प्राणान्तः अपि भवितुं शक्नोति स्म। यदि कश्चित् चिकित्सालयः उचिते काले कस्मैचित् अपि जनाय स्वास्थ्यसेवां न अदास्यत् तर्हि एतस्य तात्पर्यम् अस्ति यत् तेन तस्मै जनाय जीवनस्य सुरक्षा न दीयते। न्यायालयेन इदम् अपि उक्तं यत् सर्वकारस्य कर्त्तव्यम् अस्ति यत् सः रोगिणां कृते आवश्यक-स्वास्थ्य-सेवाः दद्यात् यस्याम् आकस्मिकरोग-निवारणस्य सुविधा अपि सम्मिलिता भवेत्। चिकित्सालयः तत्सम्बन्धिनः कर्मचारिणः च स्वस्य आवश्यक-चिकित्सायाः प्रदानस्य दायित्वं सम्पूर्णतया निर्वहेयुः। बहुभिः सर्वकारीय-चिकित्सालयैः हाकिम-शेखस्य चिकित्सा न कृता तैः प्रत्यक्षतः अनङ्गीकृतम्। अतः न्यायालयेन राज्यसर्वकारः उक्तः यत् सः हाकिम-शेखेन चिकित्सायाः कृते यद् धनं व्ययीकृतं तत् सम्पूर्णं धनं तस्मै दद्यात्।

## निजस्वास्थ्यसेवाः

अस्माकं देशे बहुविधाः निज-स्वास्थ्य-सेवाः उपलभ्यन्ते। व्यापक-स्तरे चिकित्सकाः निज-औषधालयान् चालयन्ति। ग्रामीणेषु क्षेत्रेषु पञ्जीकृताः चिकित्सा-व्यवसायिनः (आर.एम.पी.) उपलभ्यन्ते। नागरक्षेत्रेषु व्यापक-सङ्ख्यायां चिकित्सकाः सन्ति येषु बहवः विशेषज्ञरूपेण कार्यं कुर्वन्ति। निजरूपेण सञ्चाल्यमानाः केचन चिकित्सालयाः परिचारिका-गृहाणि च सम्मिलितानि सन्ति। व्यापक-सङ्ख्यायां प्रयोगशालाः सन्ति याः परीक्षणं कुर्वन्ति अपि च विशिष्ट-सुविधाः यच्छन्ति यथा एक्स्रे-अल्ट्रासाउंड इत्यादयः। एतादृशाः आपणाः अपि सन्ति यतः वयम् औषधानि क्रेतुं शक्नुमः। यथा एतस्याः नाम्ना एव ज्ञायते निजस्वास्थ्य-सेवासु सर्वकारस्य

***केषु केषु अर्थेषु 'सार्वजनिकस्वास्थ्यव्यवस्था' सर्वेषां कृते उपलब्धा सेवा अस्ति?***

***केषाञ्चित् स्वास्थ्यकेन्द्राणाम् अथवा चिकित्सालयानां सूचीं कुर्वन्तु ये भवतां गृहस्य पार्श्वे सन्ति। स्व-अनुभवस्य अनुसारम् अथवा तेषु कञ्चित् चिकित्सालयं गत्वा केन्द्रसञ्चालकानां जनानां विषये अपि च तत्र दीयमानानां सुविधानां विषये जानन्तु।***

स्वामित्वं नियन्त्रणं वा न भवति । सार्वजनिक-स्वास्थ्य-सेवानां विपरीततया एतासु निजस्वास्थ्य-संस्थासु रोगिभिः प्रत्येकं सेवायाः कृते आधिक्येन धनस्य व्ययः करणीयः भवति।

अद्यत्वे निजस्वास्थ्यसेवाः सर्वत्र दृश्यन्ते । अधुना तु महान्तः व्यवसायिसमूहाः चिकित्सालयान् अपि सञ्चालयन्ति । केचन व्यवसायिसमूहाः औषध-निर्माणकार्ये तस्य विक्रयणे च संलग्नाः सन्ति। नगरे प्रत्येकं भागे औषधानाम् आपणाः द्रष्टुं शक्यन्ते।

## *स्वास्थ्यसेवाः समानताः च - किं सर्वेषां कृते पर्याप्तमात्रया स्वास्थ्यसेवाः उपलब्धाः सन्ति ?*

अधुना भारते तथा परिस्थितयः सन्ति यत्र निजसेवाः तु वर्धन्ते परन्तु सार्जनिकसेवाः न वर्धन्ते। एतादृश्यां स्थितौ जनाः केवलं निजसेवाः एव प्राप्नुवन्ति। एताः नागरेषु क्षेत्रेषु एव उपलब्धाः सन्ति। एतासां सेवानां मूल्यम् अपि अपेक्षातः अधिकं भवति । औषधानि बहुमूल्यानि भवन्ति । बहवः जनाः औषधानि क्रेतुं समर्थाः न भवन्ति अतः यदा परिवारे रोगः जायते तदा ते ऋणं गृहीत्वा चिकित्सां कारयन्ति।

काश्चन निजसेवाः अधिकम् अर्जयितुं प्रायः एतादृशानि कार्याणि प्रोत्साहयन्ति यानि उचितानि न सन्ति । कदाचित् अल्प-मूल्यकेषु उपायेषु विद्यमानेषु सत्सु अपि रोग-निवारणार्थं ते उपायाः न प्रयुज्यन्ते। उदाहरणार्थं प्रायेण दृश्यते यत् केचन चिकित्सकाः निरर्थकम् औषधानि लिखन्ति यासां कदाचित् आवश्यकता अपि न स्यात् यथा यदि साधारण-चिकित्सा अपि पर्याप्ता भवितुं शक्नोति तथापि सूच्यौषधस्य अथवा सेलाइनादिकस्य विषये परामर्शं यच्छन्ति।



देहलीनगरस्य कस्मिंश्चित् प्रमुखे निजचिकित्सालये शल्यचिकित्सायाः पश्चात् रोगिणां निरीक्षणस्य कश्चित प्रकोष्ठः।

भवतः गृहस्य समीपे काः निजस्वास्थ्यसेवाः विद्यन्ते ? तत्रत्यानां सञ्चालकानां सुविधानां च विषये जानन्तु ?

भारतीयायुर्विज्ञानपरिषदः आयुर्विज्ञान-नैतिकसंहिता कथयति -

यत् यथा सम्भवं प्रत्येकं चिकित्सकः औषधीनां जेनेरिकनामानि एव उपचारचिटिकायां लिखेत् तथा च सुनिश्चेतव्यं यत् इदं युक्तियुक्तं उपयुक्तं च स्यात्।

***स्वास्थ्यसेवाः इतोऽपि न्यूनमूल्ययुक्ताः कथं कर्तुं शक्यन्ते? एतस्मिन् विषये चर्चां कुर्वन्तु।***




***ग्रामीणक्षेत्रेषु प्रायेण किञ्चित् जीपयानम् एव रोगिणां कृते चलौषधालयस्य रूपेण कार्यं करोति।***

तथ्यम् इदम् अस्ति यत् जनसङ्ख्यायाः 20 प्रतिशतं जनाः एव रोगकाले आवश्यकौषधानि क्रेतुं समर्थाः भवन्ति। ते जनाः अपि यान् वयम् एते निर्धनाः न सन्ति इति अभिजानीमः ते अपि औषधानां व्ययस्य भारं निर्वोढुं कष्टम् अनुभवन्ति । एकस्मात् अध्ययनात् ज्ञातं यत् ये जनाः चिकित्सालये केनचित् रोगेण अथवा व्रणितावस्थायां प्रवेशं स्वीकुर्वन्ति तेषु चत्वारिंशत् प्रतिशतं जनाः चिकित्सा-व्ययार्थं रूप्यकाणि ऋणरूपेण स्वीकुर्वन्ति अथवा स्वसम्पत्तेः कञ्चित् भागं विक्रीणन्ति।



एषा गर्भवती महिला स्वस्य निरीक्षणं योग्यचिकित्सकस्य समीपे कारयितुं पद्भ्यां दूरं चलितुं बाध्या अस्ति।

निर्धनजनानां कृते परिवारे प्रत्येकं रोगः चिन्तायाः कष्टस्य च कारणरूपं भवति। एतस्माद् अपि महत्त्वपूर्णं तथ्यम् इदम् अस्ति यत् एतादृशी स्थितिः पौनःपुन्येन आगच्छति । निर्धनाः पूर्वम् एव कुपोषणग्रस्ताः भवन्ति । एते परिवाराः तावन्मात्रया भोजनं न कुर्वन्ति यावन्मात्रया तैः भोक्तव्यं भवति । तेषां कृते जीवनस्य आधारभूताः आवश्यकता-अनुगुणाः सुविधाः यथा पानीयं जलं गृहस्य कृते पर्याप्तस्थानं स्वच्छवातावरणादीनि न उपलभ्यन्ते । अतः तेषां मध्ये रोगोत्पतेः सम्भावना अधिका भवति। रोगनिवारणे यः व्ययः भवति तस्मात् कारणात् तेषां स्थितिः इतोऽपि असमीचीना जायते।

कदाचित् केवलं धनकारणात् एव जनाः उत्तमां चिकित्सां न कारयितुं पारयन्ति इति अपि नास्ति । उदाहरणार्थं महिलाः शीघ्रम् एव चिकित्सकस्य पार्श्वे रोगनिवारणार्थं न प्रापयन्ति। अनेकेषु आदिवासिक्षेत्रेषु स्वास्थ्यकेन्द्राणि न्यूनानि सन्ति तथा च तानि अपि सम्यग्रूपेण न चलन्ति। तत्र निजस्वास्थ्यसेवाः न विद्यन्ते।

**किं कर्तुं शक्यते ?**

अत्र कश्चित् अपि सन्देहः नास्ति यत् अस्माकं देशे जनानां स्वास्थ्यस्य स्थितिः सम्यक् नास्ति । एतत् सर्वकारस्य उत्तरदायित्वम् अस्ति यत् सः सर्वेभ्यः नागरेभ्यः विशेषतया निर्धनानां सुविधाहीनानां च जनानां कृते गुणात्मक-स्वास्थ्य-सेवानाम् उपलब्धिं कारयेत्। पुनरपि जनानां स्वास्थ्यं यावद् जीवनस्य आधारभूतानां सुविधानां कृते तथा च सामाजिक-स्थितौ आश्रितम् अस्ति तावद् एव स्वास्थ्य-सेवानाम् अपि आश्रितम् अस्ति। अतः जनानां स्वास्थ्यसेवायाः अवस्थां परिष्कर्तुम् उभयोः पक्षयोः कार्यं भवेत् इति आवश्यकम् अस्ति। एतत् कर्तुं शक्यते। अग्रिमे पृष्ठे प्रदत्तानि उदहरणानि पश्यन्तु-




***आन्ध्रप्रदेशराज्यस्य पुनर्सङ्घटनानन्तरं जूनमासस्य द्वितीयदिनाङ्के 2014 तमे वर्षे तेलङ्गाना भारतस्य एकोनत्रिंशततमं राज्यं जातम् ।***

***उपरिप्रदत्तस्य भारतस्य मानचित्रे केरलराज्यं पाटलवर्णेन दर्शितम् अस्ति ।***

एतस्य पुस्तकस्य १२३ तमे पृष्ठे भारतस्य मानचित्रं प्रदत्तम् अस्ति । एतस्मिन् मानचित्रे स्वाङ्कन्या केरलराज्यस्य आकृतिं रचयतु ।

### *केरलराज्यस्य अनुभवः*

1996 तमे वर्षे केरलसर्वकारेण कानिचन महत्त्वपूर्णानि परिवर्तनानि कृतानि । राज्यस्य सम्पूर्णस्य वार्षिक-आय-व्ययविवरणपत्रस्य 40 प्रतिशतं पञ्चायतानां कृते प्रदत्तम् । एतेन धनेन पञ्चायतानि स्वावश्यकताः योजनाबद्धाः कृत्वा तासां पूर्तिं कर्तुं शक्नुवन्ति स्म । एतेन ग्रामस्य कृते पेयजलम् आहारः महिलानां विकासाय शिक्षादीनां कृते च उचितव्यवस्थायाः सुनिश्चितीकरणं सम्भवं जातम् । एतस्मात् परिणामतः जलवितरणव्यवस्थायाः निरीक्षणं जातम् । विद्यालयानां बालवाटिकानां च कार्यं निर्धारितं तथा च ग्रामीणसमस्यानां विषये विशेषतया ध्यानं दत्तम् । स्वास्थ्यकेन्द्रेषु अपि परिष्कारः कृतः । एतैः सर्वैः कार्यैः स्थितिः समीचीना जाता । एतावतां प्रयत्नानाम् अनन्तरम् अपि काश्चन समस्याः यथावत् स्थिताः, यथा औषधानां न्यूनता चिकित्सालयेषु अपर्याप्ताः शय्याः चिकित्सकानाम् अपर्याप्तता इत्यादि । एतासां समस्यानां दूरीकरणम् आवश्यकम् अस्ति ।

आगच्छन्तु अधुना कस्यचित् अन्यस्य देशस्य उदाहरणं पश्यामः तथा च स्वास्थ्यसम्बद्धविषयेषु तेषां कार्यपद्धतिं जानीमः।

### *कोस्टारिकायाः शैली*

कोस्टारिका दक्षिण-अमेरिकायाः सर्वतः अधिकः स्वस्थदेशः मन्यते । एतस्य मुख्यकारणं तस्य संविधाने निहितम् अस्ति । बहुभ्यः वर्षेभ्यः प्राक् कोस्टारिकया कश्चित् महत्त्वपूर्णः निर्णयः स्वीकृतः आसीत् यत् कोस्टारिका देशे सैन्यं न स्थापयिष्यति । एतस्मात् सेनायां यः व्ययः भवति स्म तस्य धनस्य उपयोगः जनानां स्वास्थ्यस्य शिक्षायाः तथा च अन्यासाम् आधारभूतानाम् आवश्यकतानां कृते कृतः । कोस्टारिकायाः सर्वकारः मन्यते यत् देशस्य विकासार्थं देशस्य स्वास्थ्यम् आवश्यकम् अस्ति तथा च एतस्मात् कारणात् एव तत्रत्यः सर्वकारः स्वस्य देशवासिनां स्वास्थ्यस्य विषये महद् अवधानं करोति । कोस्टारिकायाः सर्वकारः स्वस्य सर्वेभ्यः निवासिभ्यः स्वास्थ्यस्य कृते मूलभूतसेवाः सुविधाः च प्रयच्छति यथा पेयजलं स्वच्छतां पोषणम् आवासं च । स्वास्थ्यस्य शिक्षा अतीव महत्त्वपूर्णा मन्यते तथा च सर्वेषु स्तरेषु “स्वास्थ्य-सम्बन्धि-ज्ञानं” शिक्षायाः कश्चित् आवश्यकः भागः अस्ति ।

# *अभ्यासः*

*1* अस्मिन् अध्याये भवद्भिः पठितम् अस्ति यत् स्वास्थ्ये केवलं रोगस्य चर्चा न कर्तुं शक्यते। संविधानतः स्वीकृतम् अंशम् अत्र पठन्तु तथा च स्वशब्देषु ज्ञापयन्तु यत् "जीवनस्तरस्य सार्वजनिकस्वास्थ्यस्य च के मानकबिन्दवः भविष्यन्ति।

2 सर्वेषां कृते स्वास्थ्यसुविधाः दातुं सर्वकारः कान् कान् प्रयासान् कर्तुं शक्नोति ? चर्चां कुर्वन्तु।

3 भवन्तः स्वक्षेत्रे उपलब्धानां सार्वजनिकसेवानां निजस्वास्थ्यसेवानां च मध्ये काः काः विभिन्नताः पश्यन्ति ? अधोलिखिततालिकां पूरयन् एतेषां तुलनां कुर्वन्तु तथा च अन्तरं ज्ञापयन्तु।

संविधानस्य एकः महत्त्वपूर्णः भागः एतत् कथयति यत् पोषाहारस्तरस्य जीवनस्तरस्य च उन्नयनं तथा च लोकस्वास्थ्यस्य परिष्कारः राज्यसर्वकारः दायित्त्वम् अस्ति।

| *सुविधा* | *सामर्थ्यम्* | *उपलब्धता* | *गुणवत्ता* |
|---|---|---|---|
| *निजः* | | | |
| *सार्वजनिकः* | | | |

*4.* जलस्य स्वच्छतायाः च गुणवत्तायाः परिष्कारं कृत्वा अनेकेषां रोगाणां नियन्त्रणं कर्तुं शक्यते। उदाहरणं प्रदर्श्य इदं कथनं स्पष्टीकरोतु।

**शब्द-सङ्कलनम्**

**सार्वजनिकः** – *सा सेवा अथवा तत् कार्यं भवति यः देशस्य सर्वेषां जनानां कृते अस्ति तथा च मुख्यरूपेण सर्वकारेण आयोज्यते। एतस्यां विद्यालयाः चिकित्सालयाः संचारसेवाः च सम्मिलिताः सन्ति। जनाः एतासां सेवानां याचनां कर्तुं शक्नुवन्ति तथा च यदि संस्थाः सम्यग्-रूपेण कार्यं कर्तुं समर्थाः न भवेयुः तदा जनाः एतासु आक्षेपं कर्तुं शक्नुवन्ति।*

**निजी** - *सा सेवा अथवा तत्कार्यं यत् केनचित् जनेन अथवा केनचित् व्यवसायिसमूहेन स्वलाभार्थम् आयोजितः स्यात्।*

**चिकित्सापर्यटकः** – *एते ते वैदेशिकपर्यटकाः सन्ति ये एतस्य देशस्य तेषु चिकित्सालयेषु स्वचिकित्सां कारयितुं विशेषरूपेण आगच्छन्ति यत्र स्वदेशस्य तुलनायां न्यूनतमे मूल्ये विश्वस्तरीयाः सुविधाः उपलभ्यन्ते।*

***सङ्क्रामकरोगाः*** - *एते रोगाः तादृशाः भवन्ति ये परस्परम् अन्योऽन्यं प्रति सञ्चारिताः भवन्ति यथा भोजनेन जलेन वायुना च गच्छन्ति।*

**ओ.पी.डी.** – *एतत् बाह्यरोगिविभागस्य संक्षिप्तरूपम् अस्ति। चिकित्सालये कस्मिंश्चित् विशिष्टे विभागे प्रवेशात् पूर्वं रोगिणः बाह्यरोगिविभागं गच्छन्ति।*

**नैतिकाचारः** – *कस्यापि जनस्य व्यवहारं प्रभावयितुं नैतिकसिद्धान्ताः।*

**जेनेरिकनाम** – *औषधीनां रासायनिक-नामानि। तानि औषधिषु प्रयुक्तसामग्रीः परिचेतुं साहाय्यं कुर्वन्ति। ते वैश्विकस्तरे मान्यताप्राप्ताः सन्ति। उदाहरणार्थम् एसिटाइल-सालिसैलिक-एस्पिरिन इत्यस्य जेनेरिकनाम अस्ति।*